# वेदाङ्गज्योतिषसिद्धान्तज्योतिषयोस्तुलनात्मकमनुशीलनम्


## कपिलदेवभट्टराईः

*सह-प्राध्यापकः, ने.सं.वि., कालिका-संस्कृत-विद्यापीठम्*

kapildevbhattarai@gmail.com



### लेखसारः

*पौरस्त्यसंस्कृतवाङ्मयेऽनेककालावच्छेदेनानेकदेशावच्छेदेन च विरचितान्यनेकाचार्यसम्बद्धानि महार्घरत्नतुल्यानि बहूनि ज्योतिषशास्त्रसम्बद्धानि ग्रन्थरत्नानि जगति प्रसिद्धानि सन्ति। तेषु भास्कराचार्यस्य सिद्धान्तशिरोमणिः, लगधमुनेः वेदाङ्गज्योतिषम्, सूर्यमयासुरसंवादरूपसूर्यसिद्धान्तः, कमलाकरस्य सिद्धान्ततत्त्वविवेकः, ज्ञानराजस्य सिद्धान्तसुन्दरमित्यादीनि ग्रन्थरत्नानि सर्वत्र प्रसिद्धानि विख्यातानि च सन्ति। सृष्टितोऽद्यपर्यन्तमनेकेषु कालखण्डेषु भारतवर्षेऽस्मिननेके ज्योतिर्विदोऽभवन्। तेषु ब्रह्मगुप्त-आर्यभट-लल्ल-मुञ्जाल-शतानन्द-रामदैवज्ञ-केशवदैवज्ञ-श्रीपति-गणेशदैवज्ञ-नारायणदैवज्ञ-भास्कराचार्य-कमलाकर- सुधाकर- केतकर- गोविन्द- केदारदत्त- वापूदेव- सीताराम-कपिलेश्वरादयो विशेषपरिचिताः सन्ति ज्यौतिषजगति। भारतवर्षेऽस्मिन् भास्कर इव भासमानो भास्कराचार्योऽनन्यतमो मन्यते। ज्योतिषविदुषा भास्कररूपेण भास्कराचार्येण पाटीगणितरूपं लीलावतीगणितं, बीजगणितं, सिद्धान्तशिरोमणिः, करणकुतूहलमिति ग्रन्थचतुष्टयं मुख्यरूपेण विरचितम्। भास्कराचार्येण स्वजन्मस्थानकालरचनादिविषये गोलाध्यायस्य प्रश्नाध्यायस्यान्तेऽऽत्मीयः परिचयः प्रदत्तोऽतोऽस्य जन्मसमयस्थानादिविषये विवादस्याऽवसरो न वर्तते। षट्त्रिंशद्वर्षीयेऽवस्थायां भास्कराचार्येण सिद्धान्तशिरोमणेः रचना कृता। भास्कराचार्येण स्वकाल उपलब्धसर्वेषां सिद्धान्तग्रन्थानामालोडनं कृत्वा तत्तद् ग्रन्थेभ्यः सारतत्त्वं निष्काश्य स्वसिद्धान्ते निवेशितः। यथा हि श्रीधरस्योदयान्तरं, मुञ्जालस्यायनगतिं च स्वसिद्धान्तशिरोमणौ स्थानं प्रदत्तम्। असौ ब्रह्मगुप्ताद् वराहमिहिराच्च विशेषरूपेण प्रभावितः आसीत्। अनेन ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्ताधारेणैव सिद्धान्तशिरोमणेः रचना कृतेति स्वयमेवोक्तम्। लगधमुनिरेव वेदाङ्गज्योतिषस्य प्रवक्तृत्वेन स्मृतः। लगधमुनेः जन्मकालविषये विदुषां मतवैविध्यमस्ति। विषयेऽस्मिन् याथातथ्यं न प्राप्यते। लगधस्य मूलग्रन्थस्तु साम्प्रतं नोपलभ्यते न च संहितादिग्रन्थेषु स उद्धृतोऽपि तथापि तत्प्रोक्तत्वेन तत्पश्चाद्वर्तिना केनापि प्रणीतो वेदाङ्गज्योतिषाऽऽख्यो ग्रन्थः सम्प्रति लभ्यते।*



### विशेषशब्दाः

अवदानं, निरुक्तं, लगधमुनिः, वेदाङ्गज्योतिषम्, शब्दशास्त्रम्।


### विषयप्रवेशः

'द्योतते', 'द्युत्यते', 'द्योतनं' वा इत्यर्थे 'द्युतेरिषिन्नादेशश्च जः' इति सूत्रेण 'ज्योतिस्' शब्दो निष्पद्यते। ज्योतींषि प्रतिपाद्यन्ते यस्मिनित्यर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेण निष्पन्नः ज्योतिषशब्दो ज्योतिः प्रतिपादकं साङ्केतम्। अथवा 'द्योतन्ते प्रकाशन्ते ग्रहनक्षत्रादीनि अनेन' इति व्युत्पत्त्या उणादिनिष्पन्नोऽयं ज्योतिषशब्दः। ( चतुर्वेदः, वि.सं.२०३८ : प्रस्तावना–२) 'ज्योतींषि अधिकृत्य कृतं शास्त्रं ज्योतिषमिति व्युत्पत्त्या'

चन्द्रसूर्यादीनामाकाशीयज्योतिर्मयपिण्डानां गतिस्थित्यादिबोधकं शास्त्रमेव ज्योतिषमिति सर्वैर्ज्ञायते। ( शर्मा, ख्रैस्ताब्दः २००५ : १) ज्योतिषशास्त्रं संस्कृतवाङ्मयस्यामूल्यरत्नं मन्यते। संस्कृतवाङ्मयं हि विश्ववाङ्मयसमुदाये मूर्द्धन्यमिति न सम्भवति कस्याऽपि विमतिः। अस्य हि विस्तृतं सुसमृद्धञ्च सर्वाङ्गपूर्ण कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। अत्रत्यो हि शाश्वतः सार्वभौमश्च ज्ञाननिधिरनादिकालादारभ्य साम्प्रतिकयुगपर्यन्तमपि अनवरतरूपेणोपचीयमानो दृश्यते। वाङ्मयमिदमेवादाय 'यन्नेहाऽस्ति न चान्यत्र यदिहास्ति न तत्क्वचित्' इत्युक्तिश्चरितार्था दृश्यते। समस्तमपि वाङ्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि पुराणं न्यायो मीमांसा धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति। तेषाञ्च शाखाः प्रशाखाश्च सहस्रधा विभक्ता व्याख्याताश्च सन्ति। मूलतश्चत्वारो वेदाश्चतस्रो मूलसंहिता वा ऋग्यजुःसामाथर्वाख्याश्च सन्ति। प्रवृत्तिनिवृत्तिमार्गनिर्देशनपरं हि संस्कृतवाङ्मयं कलेवरेण गुणेन च सर्वाण्यतिशेत इति न प्रमादिकम्।

यस्मिन् शास्त्रे सूर्यादिग्रहाणां गतिसम्बन्धिनः सर्वे नियमाः प्रतिपाद्यन्ते तथा च तेषां ग्रहाणां भौतिकपदार्थेषु यत् प्रभावो भवति, तस्य यत्र वैज्ञानिकरीत्या विवेचनं विविच्यते, यस्मात् कालबोधो भवति तदेव ज्योतिषशास्त्रमिति वचनाद् विश्वस्मिन् विश्वे ज्योतिषस्यातीव प्रभावो दृश्यते। कालाधीनं यज्ञकर्म सम्पादनाय प्रवृत्तानामस्माकं वेदानामपि यज्ञकालनिर्धारणाय ज्योतिषशास्त्रे विश्वासोऽस्ति। वेदानां कृते आवश्यककालनिर्धारणाय ज्योतिषस्यापरिहार्यतां विलोक्यैवास्य शास्त्रस्य वेदाङ्गत्वमुक्तम्। (आचार्य, सन् २०१७ : २)

भास्कराचार्येणास्य प्रमाणमित्थं प्रदर्शितम्।

*वेदास्तावदद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।*
*शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्॥*

(सिद्धान्तशिरोमणिः, कालमानाध्यायः- ९)

तथैव लगधमुनिना वेदाङ्गज्योतिषे लिखितमस्ति यथा–

*वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।*
*तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञम्॥ (याजुषज्योतिष–३)*

वेदानां षडङ्गेषु ज्योतिषशास्त्रं चक्षुस्थानीयं भूत्वास्य प्राधान्यमतीव विद्यत इति सिद्धान्तशिरोमणौ भास्करीयं कथनं प्राप्यते यथा–

*शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ।*
*यातु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः॥*
*वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येस्य तेनोच्यते।*
*संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः॥*

( सिद्धान्तशिरोमणिः, कालमानाध्यायः– १०–११)

शास्त्रेऽमिन् प्रत्यक्षाऽनुमितियुक्तिरूपपत्तिरिति प्रमाणचतुष्टयमङ्गीक्रियते। अन्येषु वेदाङ्गशास्त्रेषु शब्दप्रामाण्यत्वादाप्तत्वे च विवादस्याऽवसर उत्पद्यते। अनेनैव कारणेन पूर्वीयदर्शनेषु वैविध्याङ्गविवादश्च दृश्यतेऽनुभूयते च। तत्र केचिदास्तिकाः, केचन नास्तिकाः, केचिद् बौद्धाः, कतिचिज्जैना वा सन्ति, सर्वेऽपि स्वात्मनि विश्वसन्ति। तेषां विचारसरणि, तत्त्वप्रतिपादनं प्रमाणानि च नैकविधानि सन्ति। किन्तु ज्योतिषशास्त्रे प्रत्यक्षादेर्विरुद्धानि ऋषिवाक्यान्यपि प्रामाण्यत्वेन नाङ्गीक्रियन्ते। अत एवाऽत्र तादृग् विवादस्याऽवसरो नायाति। अत एवोक्तम् – *'प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।'*

इत्थं वयं पश्यामो यज्ज्यौतिषशास्त्रे प्रत्यक्षादीनां प्रामाण्यत्वादनेन शास्त्रेण यस्मिन् दिने ग्रहणादीनां या भविष्यवाणी विधीयते सा प्रत्यक्षरूपेण दृश्यते, अतोऽत्राऽन्यवेदाङ्गशास्त्रवत् तादृशो विवादो नोत्पद्यते। अत एव वेदाङ्गशास्त्रेषु ज्यौतिषशास्त्रस्य प्राधान्यत्वमङ्गीक्रियते। अस्य सिद्धान्त–संहिता–होरेति शाखात्रयं विद्यते। अत्रानुसन्धानाय गृहितं सिद्धान्तशिरोमणि–वेदाङ्गज्योतिषमिति ग्रन्थद्वयमेव ज्यौतिषस्य सिद्धान्तशाखाया अमूल्यरत्नरूपं भजते।

वस्तुतो मानवसम्बद्धानां सर्वेषामपि पदार्थानां त्रैकालिकं ज्ञानं ज्योतिषशास्त्रमेव दिशति। वेदनिर्दिष्टाः यज्ञाश्च समुचितं कालमपेक्ष्यन्ते। समुचितकालश्च ज्योतिषादेव ज्ञायते।अतः ज्योतिषं विना लौकिकवैदिककर्मतन्त्रं निखिलमपि अन्धकारमयं जायत इति ज्योतिषशास्त्रं वेदाङ्गेषु मूर्धन्यं स्थानं भजते। ज्योतिषशास्त्रस्य लोके वेदे च सर्वत्रोपादेयत्वेन च चर्चानुभूयते। जगति ये जनाः ज्योतिषं जानन्ति ते देवज्ञाः भवन्ति। लगधमुनि-भास्कराचार्यौ द्वावेव ख्यातिभाजौ दैवज्ञौ मन्येते। ज्योतिषशास्त्रस्य सिद्धान्तपक्षे नैकविधान् सिद्धान्तग्रन्थान् विलिख्य प्रख्यातो भास्कराचार्यस्तथा वेदाङ्गज्योतिषग्रन्थरत्नं विलिख्य प्रसिद्धो लगधमुनिर्द्वयोरेव योगदानस्य तुलनात्मिकी चर्चाऽत्र क्रियते।

## अध्ययनस्य प्रमुखाःसमस्याः

ज्योतिषशास्त्रसम्बद्धानि बहून्यध्ययनानि सन्ति सम्पन्नानि। ज्योतिषशास्त्रमधिकृत्य बहुभिरनुसन्धातृभिर्ज्योतिषशास्त्रस्वरूपं लेखरचनादिमाध्यमेनाविष्कृतं विलोक्यते। ज्योतिषशास्त्रं समेषां लौकिकवैदिककर्मसम्बद्धानां जनानां कृते महदुपकारकं, व्यावहारिकञ्च विद्यते। एतदर्थं शास्त्रमिदं सर्वैरवगन्तव्यमित्यध्ययनेऽस्मिन् विशेषतः सूत्ररूपेण समस्यात्रयं समायाति-

क. ज्योतिषशास्त्रे वेदाङ्गज्योतिषसिद्धान्तशिरोमणिग्रन्थयोः स्थानं कीदृशमस्ति ?

ख. ज्योतिषवाङ्मये लगधमुनिभास्कराचार्ययोरवदानं कीदृशमस्ति ?

ग. वेदाङ्गज्योतिषसिद्धान्तज्योतिषग्रन्थयोः प्रतिपादितसिद्धान्ते पार्थक्यं किम् ?

## अध्ययनस्योद्देश्यम्

वेदाङ्गेषु ज्योतिषशास्त्रस्य स्थानं चक्षुरूपात्मकं भासते। सिद्धान्तसंहिताहोरेति त्रिषु स्कन्धेषु विभाजितस्य ज्योतिषशास्त्रस्य अन्वेषणात्मकमध्ययनं कृत्वा अध्ययनक्रमे प्राप्तानां सामग्रीणां सत्यापनपरीक्षणमेवास्य शोधपत्रस्य मूलमुद्देश्यं वर्तिष्यते। तत्रापि वेदाङ्गज्योतिषसिद्धान्तज्योतिषग्रन्थयोः प्रतिपादितसिद्धान्तानां तुलनात्मकमनुशीलनम् अस्य अध्ययनस्योद्देश्यं भविष्यति। मूलतः शोधप्रबन्धस्यास्य प्राङ्निर्दिष्टसमस्यानुरूपाणि तत्समाधानपराणि चोद्देश्यानि भविष्यन्ति। यथा-

क. ज्योतिषशास्त्रे वेदाङ्गज्योतिष-सिद्धान्तशिरोमणिग्रन्थयोः स्थानं निर्धारणम्।

ख. ज्योतिषवाङ्मये लगधमुनि-भास्कराचार्ययोरवदानविषये समीक्षणम्।

ग. वेदाङ्गज्योतिष-सिद्धान्तशिरोमणिग्रन्थयोः प्रतिपादितसिद्धान्ते पार्थक्यं विवेचनम्।

## अध्ययनविधिः

लेखस्यास्य निष्पादनाय मुख्यसामग्रीः सङ्कलयितुं विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतो विद्यते। ज्योतिषशास्त्रसम्बद्धानि ग्रन्थरत्नानि च लेखस्यास्य प्रमुखस्रोतांसि सन्ति। एवं ज्योतिषशास्त्रसम्मता

व्याख्यानात्मकाः, टीकात्मकाः, समालोचनात्मकाः, विश्लेषणात्मकाश्चान्ये ग्रन्था आलेखाश्च द्वितीयसामग्रीत्वेनोररीकृता विद्यन्ते। सोहापोहं ज्योतिषशास्त्रावबोधाय तत्प्रयोजनविश्लेषणाय च यथावसरं ग्रन्थान्तरावलोकन-विश्लेषणादिविधयश्चोपयुज्यन्ते। एवमेव यथावश्यकं तुलना-चिन्तन-मननादिविधयश्च प्रयोगविषयतामापद्यन्ते। क्वचिद् यथाकामं गभीरविषयचिन्तनविधौ स्वोपज्ञविधिश्चावलम्ब्यते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

जगति सुप्रसिद्धं ज्योतिषशास्त्रमेवाध्ययनस्यास्य प्रमुखं क्षेत्रमस्ति। तच्छास्त्रमधिकृत्य तत्स्वरूपं तत्प्रयोजनञ्च निर्धार्यते। ज्योतिषशास्त्रान्तर्गतानि सर्वाण्यपि ज्योतिषस्याङ्गोपाङ्गभूतानि ग्रन्थरत्नानि तत्रोद्घाटितानि तथ्यानि चात्र क्षेत्रान्तर्गतानि सन्ति। तत्र विशेषतः लगधमुनिप्रोक्तं वेदाङ्गज्योतिषग्रन्थं तथा भास्कराचार्यप्रोक्तं सिद्धान्तशिरोमणिग्रन्थं चाधृत्य द्वयोः सिद्धान्तयोस्तुलनात्मकमध्ययनं विधीयते । एवं तदतिरिक्ता विषयाश्च सीमारूपेण वर्तन्ते। एतावताध्ययनमिदं ज्योतिषशास्त्रसम्बद्धे क्षेत्रे पदं निदधातीति तस्य क्षेत्रत्वं तदतिरिक्तविषयेषु न प्रवर्तत इति तेषां सीमारूपत्वमध्ययनस्य सीमाङ्कनत्वं वा बोध्यम्।

## भास्कराचार्यः

सिद्धान्तशिरोमणे रचयिता भास्कराचार्यो ज्यौतिषजगति भास्कर इव भासते। अनेन विदुषा पाटीगणितरूपं लीलावतीगणितं, बीजगणितं, सिद्धान्तशिरोमणिकरणकूतुहलमिति ग्रन्थचतुष्टयं मुख्यरूपेण विनिर्मितम्। भास्कराचार्येण स्वजन्मस्थानकालरचनादिविषये गोलाध्यये प्रश्नाध्यायस्यान्तेऽऽत्मीयः परिचयः प्रदत्तोऽतोऽस्य जन्मसमय-स्थानादिविषये विवादस्याऽवसरो न वर्तते। (शर्मा, सन् २००५:१०) षट्त्रिंशद्वर्षीयाऽवस्थायां अनेन सिद्धान्तशिरोमणेः रचना कृतेति स्वयमेवोक्तं भास्करेण। यथा-

*रसगुणपूर्णमही १०३६ समशकसमयेऽभवन्ममोत्पत्तिः*
*रसगुण ३९ वर्षेण मया सिद्धान्तशिरोमणी रचितः ॥*

(सि. शि. गोलाध्याये प्रश्नाध्याय- ५८)

*तथैव भास्करेण स्वजन्मस्थानादिविषयेऽपि लिखितं यथा-*
*आसीत् सह्यकुलाचलाश्रितपुरे वैविद्यविद्वज्जने*
*नानासज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः।*
*श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः*
*साधूनामवधिमहेश्वरकृती दैवज्ञचूडामणिः॥ (सिद्धान्तशिरोमणि, प्रश्नाध्याय-६१)*

भास्कराचार्यस्य कृतिषु पदलालित्यस्याऽनुप्रासाद्यलङ्काराणाञ्च प्रयोगः पदेपदे दृश्यते-

*लीलागललुलल्लोलकालव्यालविलासिके।*
*गणेशाय नमो कीलकमलामलकान्तये॥ (लीलावती, अभिन्नपरिकर्माष्टक-१)*

सिद्धान्तशिरोमणौ गोलाध्याये श्रृङ्गोन्नतेर्विवेचने चन्द्रस्य शुक्लकृष्णत्वयोः कारणं प्रदर्शयनुमपाऽनुप्रासयोः सुन्दरमुदाहरणं प्रस्तुतमस्ति-

*तरीणिकिरणसङ्गादोषपीयूषपिण्डः*
*दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति।*

*तदितरदिशि बालाकुन्तलश्यामलश्री-*
*र्घट इव निजमूर्तिच्छाययैवाऽतपस्थः ॥ (सि. शि.गोलाध्याय शृङ्गोन्नतिवासना- १)*

भास्कराचार्यः साहित्यिक एव नासीदपितु साङ्ख्यदर्शनेऽपि तस्य महत्यभिरुचिरासीदिति। उत्पादकं यत् प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरुषेण साङ्ख्याः इत्पादिश्लोकेन निदर्शनं करोति। व्याकरणशास्त्रमधीत्यैव धीमान् शास्त्रान्तरस्याऽधिकारी भवतीति उक्त्वा भास्करेण व्याकरणशास्त्रं प्रत्युच्चं सम्मानं प्रकटितमस्ति। एतान् सर्वान् भास्करश्लोकान् पठित्वा ज्ञायते यद् भास्कराचार्यो न केवलं ज्योतिषशास्त्रस्याऽपितु व्याकरण-साङ्ख्य-साहित्यादिशास्त्राणामप्यद्वितीयो विद्वानासीत्। तस्य ख्यातिर्न केवलं भारतवर्षेऽपितु विश्वस्मिन्नपि विश्वेऽद्यापि विराजते।

## सिद्धान्तशिरोमणिः

भास्कराचार्येण स्वकाल उपलब्धसर्वेषां सिद्धान्तग्रन्थानामालोढनं कृत्वा तत्तद् ग्रन्थेभ्यः सारतत्त्वं निष्कास्य स्वसिद्धान्ते निवेशितः। यथा हि श्रीधरस्योदयान्तरं भुञ्जालस्यायनगतिं च स्वसिद्धान्तशिरोमणौ स्थानं प्रदत्तम्। असौ ब्रह्मगुप्ताद् वराहमिहिराच्च विशेषरूपेण प्रभावितः आसीत्। अनेन ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्ताधारेणैव सिद्धान्तशिरोमणेः रचना कृतेति स्वयमेवोक्तम्। विषयेऽस्मिन् भास्करकथनं विद्यते यथा-

*कृती जयति जिष्णुजो गणकचक्रचूडामणि-*
*र्जयन्ति ललितोक्तयः प्रथिततन्त्रसद्युक्तयः।*
*वराहमिहिरादयः समवलोक्य येषां कृतीः*
*कृती भवति यादृशोऽप्यतनुतन्त्रबन्धेऽल्पधीः ॥ (सि. शि. मध्यमाधिकार- २)*

सिद्धान्तशिरोमणौ गणित-गोलाध्यायौ इति द्वौ विभागौ वर्तेते। गणिताध्याये मध्यमाधिकारादि द्वादशाधिकाराः सन्ति। गोलाध्यायस्तु गणिताध्यायस्योपपत्तिस्वरूपमेवास्ति। भास्कराचार्येण स्वलिखिते भासनाभाष्ये सर्वेऽपि विषयाः सोपपत्तिका विवेचिता सन्ति। गोले सोपपत्तिः करामलकवत् प्रत्यक्षं दृश्यतेऽतो गोलाध्यायस्य विशेषमहत्त्वमस्ति। “गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते” इत्युक्त्वा भास्करेण गोलाध्यायस्य महत्त्वमुपस्थापितम्। भास्कराचार्यस्य गोलाध्याय न सङ्क्षिप्तो न च बहुवृथाविस्तरः लालित्यपदयुक्तः प्रश्नरम्यः शास्त्रतत्त्वस्वरूपश्चास्ति-

*गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणु त्वं*
*नो संक्षिप्तो न च बहुवृथाविस्तरः शास्त्रतत्त्वम्।*
*लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्माद्*
*विद्वन् विद्वत्सदसि पठतां पण्डितोक्तिं व्यनक्ति ॥ (गोलाध्याय गोलप्रशंसा- ९)*

भास्करेणात्र स्वपूर्ववर्त्याचार्याणां दूषितमतानां खण्डनं कृत्वा स्वमतेन समाधानं कृतम्। सर्वेषां गणितीयपदार्थानां गोलयुक्त्योपपत्तिसम्भवाद् भास्करोक्तगोलाध्यायो यादृशः प्राञ्जलो न तथा कोऽप्यन्योऽतः सिद्धान्तशिरोमणेर्गोलाध्यायस्य विशेषमहत्त्वं वैशिष्ट्यं चास्ति। (शर्मा, सन् २००५:१५)।

ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरा चेति त्रयस्कन्धाः प्रसिद्धाः सन्ति किन्तु सिद्धान्तशिरोमणौ होरा-संहितयोर्मूलभूतः सिद्धान्तस्कन्ध एव स्यादित्यत्र न हि काचित् विप्रतिपत्तिः। सिद्धान्तशिरोमणेरुपर्यनेकाष्टीका वर्तन्ते। मुनीश्वरकृता मरीच्यभिधा, नृसिंहदैवज्ञकृता वासनावार्तिकाख्या, लक्ष्मीदासकृता गणितत्त्वचिन्तामणुमाख्योदाहरणस्वरूपा, गणेशदैवज्ञकृता विवृत्तिसमाख्या बुद्धिविलासिनी नामिका टीका च बाजा

सिद्धान्तशिरोमेर्दृश्यते। एतासु टीकासु मरीचिः सम्पूर्णः सुस्पष्टाक्षरलिखितः, काशीनाथझा-मुरलीधरठक्कुरमहोदयेभ्यो समासादितश्च।

## लगधमुनिः

वैदिकसाहित्ये वेदाङ्गज्योतिषे च योऽपि ज्योतिषविषयः प्रस्तुतः स तत्कालीनदृष्ट्या पर्याप्तोऽपि ग्रहाणां स्पष्टगतिस्थितिबोधनाय नालमिति तत्साधकतया सिद्धान्तग्रन्थानां तदपेक्षया वैशिष्ट्यम्। वेदाङ्गज्योतिषसिद्धान्तग्रन्थान्तरालवर्तिकालेऽपि सिद्धान्तभूमिकाव्याख्यातृग्रन्थैरपि भाष्यमेव। किन्तु ते सम्प्रति ज्ञानबाह्या एवास्माकम्। (दाहालः, २०१७ सन्) सिद्धान्तग्रन्थेषु वयमार्षत्वे न ख्यातं सूर्यसिद्धान्तग्रन्थमेव प्राथम्येन जानीमः साम्प्रतम्। सूर्यमयसंवादरूपस्यास्य ग्रन्थस्य मौलिकं रूपं कीदृशमासीदिति वयं नैव जानीमः। अतः इदानीं यो हि ग्रन्थस्तन्नाम्ना ख्यातः प्राप्तश्च असावेव आर्षत्वेन मानितः।

सम्प्रत्युपलब्धः सूर्यसिद्धान्तस्तु निश्चयमेव केनापि पश्चाद्भाविना विपश्चिता पूर्वप्रोक्तसिद्धान्तमाधारीकृत्य प्रणीत इति स्पष्टमेवानेन श्लोकेन-

*अल्पावशिष्टे तु कृते मयो नाम महासुरः।*

*रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्॥ (सूर्यसिद्धान्तः मध्यमाधिकारः- २)*

लगधमुनिः एव वेदाङ्गज्योतिषस्य प्रवक्तृत्वेन स्मृतः। लगधमुनेः जन्मदेशकालविषये विदुषां नैकमतम्। यथा शङ्करबालकृष्णदीक्षितः लगधमुनेः जन्मदेश काश्मीर इति सम्भवायति चेत् छोटेलालवार्हस्पत्यः बर्बरदेशं मन्यते इति रामदासगौडस्य कथनं प्राप्यते। विषयेऽस्मिन् याथातथ्यं न प्राप्यते। लगधस्य मूलग्रन्थस्तु सम्प्रति नैवोपलभ्यते न च संहितादिग्रन्थेषु स उद्धृतोऽपि तथापि तत्प्रोक्तत्वेन तत्पश्चाद्वर्तिना केनापि प्रणीतो वेदाङ्गज्योतिषाऽऽख्यो ग्रन्थः सम्प्रति लभ्यते। तत्रोक्तम्-

कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।

## वेदाङ्गज्योतिषम्

"पञ्चसंवत्सरमयम्" इत्यादेः लगधमुनिप्रोक्त-वेदाङ्गज्योतिषग्रन्थस्याऽनुकूलानां कालगणनादिकानां विषयाणां प्राचीनेषु अर्वाचीनेषु च बहुषु ग्रन्थेषुल्लेखाः प्राप्यन्ते। एतेन चाऽस्य ग्रन्थस्य प्रामाणिकपरम्पराऽऽगतत्वमनुसरणीयत्वं च स्फुटं भवति। एतस्य ग्रन्थस्याऽनुकूला विषयाश्च वेदमन्त्रसंहितासु, ब्राह्मणग्रन्थेषु, मैत्रायणीयारण्यके, बौधायनश्रौतसूत्रे, ब्रह्मवैवर्तपुराणे, ब्रह्माण्डपुराणे, भविष्यपुराणे, भागवतपुराणे, देवीभागवतपुराणे, मत्स्यपुराणे, लिङ्गपुराणे, वायुपुराणे, विष्णुपुराणे, विष्णुधर्मोत्तरपुराणे, शिवपुराणे, महाभारते, पाणिनीयव्याकरणाष्टाध्याय्याम्, कौटलीयार्थशास्त्रे, पाणिनीयव्याकरणभाष्ये, चरकसंहितायाम, सुश्रुतसंहितायाम्, सूर्यप्रज्ञप्तौ, पञ्चसिद्धान्तिकायाम्, बृहत्संहितायाम्, ब्राह्मस्फुटसिद्धान्ते, अभिधर्मकाषव्याख्यायाम्, अष्टाङ्गसङ्घहे, अष्टाङ्गहृदये, भट्टोत्पलकृतायां बहत्संहिताव्याख्यायाम्, जीमूतवाहनकृते कालविवेके, उव्वटकृतायां माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदमत्रार्षसंहिताव्याख्यायाम, हरदत्तकृतायां काशिकाव्याख्यायां पदमञ्जर्याम्, भटकाशिकाख्याया-मार्यभटीयव्याख्यायाम्, कालमाधवे, सायणकृतायामृगवेदभाष्यअमिकायाम्, विष्णुचित्तकृतायां विष्णुपुराणव्याख्यायाम्, महीधरकृतायां माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-मन्त्रार्षसंहिता-व्याख्यायाम्, महूर्तचिन्तामणिव्याख्यायां प्रमिताक्षरायाम्, पीयूषधारायां च, वीरमित्रोदये, संस्कारकौस्तुभे, मिताक्षराबालम्भट्ट्याम्, संस्काररत्नमालायाम्,

पुरुषार्थचिन्तामणौ, संस्कारभास्करे, धर्मसिन्धौ, अण्णाशास्त्रिकृतकर्मकाण्डप्रदीपे च प्राप्यन्ते। एतस्य विषयस्याऽधिकतरं स्पष्टीकरणं च पञ्चसंवत्सरात्मकयुग-संवत्सरादिवर्ष-सौरचान्द्रायन-चान्द्रादिविषयनिरूपणे, नामकरणव्यवस्थानिरूपणे, मूलग्रन्थव्याख्याने च भविष्यति। (आचार्य, सन् २००५, पृ ४४)

वस्तुतस्तु वेदाङ्गज्योतिषोपवर्णित-मध्यममानजनितसौकर्यापसारणायैवास्य प्रवृत्तिरिति सत्यमेवोच्यते। एतत्प्रागेवोक्तं यद् वेदाङ्गज्योतिषोक्तं वर्षादिमानं त्रुटीपूर्णमासीदिति। तत्र हि अयनारम्भस्य स्थिरत्वमुक्तमास्ति वस्तुतस्व न तथा। यदि प्रथमपर्यये माघशुक्लप्रतिपदायामयनारम्भस्तदा द्वितीयपर्यये प्रायः ततो दिनचतुष्कात्प्रागेव भवति एवमेव ९५ तमवर्षे द्विसप्ततिदिनेभ्यः प्रागेव भवत्ययनारम्भः। चान्द्रमासेऽपि पञ्चषु वर्षेषु ५४ घटिकाः न्यूनाः एव भवन्ति। तेन ह्यमावास्यापूर्णिमामाने पञ्चवर्षेषु एकदिवसस्यान्तरमुपजायते। वेदाङ्गज्योतिषपद्धत्यनुसारेण ९५ वर्षेषु ३८ अधिमासाः भवन्ति किन्तु वस्तुतस्तु तेषां सङ्ख्याः ३५ एवाभीष्टाः। अन्यथा हि शतत्रयवर्षे ऋतुत्रयस्यान्तरं घटते, एतदपि नाभीष्टम्। वेदाङ्गज्योतिषगतैतादृशदोषापसारणाय तदैव सूक्ष्मचिन्तनमपि प्रारब्धमासीद्यस्य फलं सूर्यसिद्धान्त इति आमनन्ति केचन। (दाहालः, सन् २०१७:६३) वेदाङ्गज्योतिषसम्बद्धे तादृशी चर्चा पूर्वकालादेव प्रचलिता आसीत् तथापि एतस्य सत्यापनपरीक्षणार्थं केनापि विदुषा नोद्यतम्। अतः विषयेऽस्मिन् सम्यगध्ययनमावश्यकमिति न कस्यापि विमतिः। वेदाङ्गज्योतिषस्य प्रणेता लगधमुनेः विषयचर्चा बहुभिर्विद्वज्जनैः स्वस्वग्रन्थेषु कृताः सन्ति। सिद्धान्तशिरोमणेर्गोलाध्यायस्य व्याख्याकारेण केदारदत्त जोशीमहाभागेन गोलाध्यायस्य भूमिकायां लगधचर्चा कृता अस्ति। तत्रानेन वेदाङ्गज्योतिषे लगधमुनिना प्रस्तुतानि गणितोदाहरणानि प्रदर्श्य सत्यापनपरीक्षणार्थं समुत्सुकान् पाठकान् निवेदितमस्ति। जोशीना तत्र सूर्यसिद्धान्तशिरोमण्यादीनां सिद्धान्तग्रन्थानां सादरं नाम गृहितम् तथापि सम्यनुमनुशीलनं न कृतम्। तथैव लगधमुनिविरचितस्य वेदाङ्गज्योतिषग्रन्थस्य व्याख्याकार आचार्यः शिवराजः कौडिन्यायनः संस्कृतवाङ्गयस्यैव अद्वितीयो विद्वान् अस्ति। अनेन विदुषा वेदाङ्गज्योतिषग्रन्थस्य व्याख्यानक्रमे गृहितानि विषयवस्तूनि व्याख्यातुमनेकानि प्रमाणानि प्रदर्शितानि सन्ति। वेदाङ्गज्योतिषस्य विषयवस्तूनां व्याख्यानक्रमे नैकविधानि शास्त्रान्तरप्रमाणानि सङ्कलय्य ग्रन्थविवेचितानेन विदुषा व्याख्यानक्रमे सूर्यसिद्धान्त-सिद्धान्तशिरोमण्यादीनां ज्योतिषग्रन्थानां नामोदाहरणानि च सादरेण बहूनि गृहितानि तथापि सिद्धान्तशिरोमणि-वेदाङ्गजयोतिषद्वयोर्ग्रन्थयोस्तुलना कृता न दृश्यते। अतः सिद्धान्तशिरोमणि-वेदाङ्गज्योतिषेति द्वयोर्मध्ये साम्यवैषम्यादिविषयेषु तुलनावश्यकी विद्यत इति (आचार्य, २००५, सन्)।

## लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थरचनाकालविचारः

लगधमुनिप्रोक्तवेदाङ्गज्योतिषग्रन्थरचनाकालस्य विषये सुधाकरद्विवेदमहाशयेन "याजुषज्यौतिषं सोमाकर-सुधाकरभाष्यसहितम् आर्चज्यौतिषं च सुधाकरभाष्येण तल्लघुविवरणेन च सहितम्" इत्युक्तस्य वाराणस्यां मेडिकल्हल्नाम्नि मुद्रायन्त्रालये १९६४ तमे वैक्रमाब्दे मुद्रितस्य ग्रन्थस्य भूमिकायां "अस्य रचना च भारतात् पूर्वं मन्मते" इत्युक्तम्। शङ्करबालकृष्णदीक्षितश्च "क्रैस्तवर्षारम्भात् पूर्वं १४१०तमे वर्षे धनिष्ठाया भोगः ९ राशय इति (गणिताद्) आगच्छति, अतः सिद्धं यत् तस्मिन् वर्षे धनिष्ठाया आरम्भे उत्तरायणारम्भोऽभूदिति। एवं च वेदाङ्गज्योतिषस्याऽयमेव समयो निश्चितो भवति" इति ब्रवीति स्मेति लखनऊनगरस्थया हिन्दीसमित्या १९७५ तमे क्रैस्ताब्दे प्रकाशितात् शिवनाथ-झारखण्डिनाऽनूदिताद् भारतीयज्योतिष-नामकाद् ग्रन्थाद् ज्ञायते।

वेदाङ्गज्योतिषस्य दीपिकाख्याया व्याख्यायाः कर्ता शामशास्त्री तु दीपिकायाः प्रारम्भे लगधप्रोक्तवेदाङ्गज्योतिषरचनाकालविषये *'वेदाङ्गज्योतिषं लोके यज्ञकालार्थसिद्धये। प्रणीतं शककालात् प्राग्*

*वत्सराणां सहस्रके'* इति ब्रवीति। पाश्चात्त्यैरालोचकैः कोलब्रूक-बेण्टलि-प्राट-म्याक्समूलर-याकोबिप्रभृतिभिरपि "पञ्चसंवत्सरमयम्" इत्यादेर्लगधप्रोक्तवेदाङ्गज्योतिषग्रन्थस्य रचनायाः समयः प्रायेण शङ्करबालकृष्णदीक्षितोक्तसमयेन तुल्य एव स्वीकृत इति "वैदिक वाङ्मय का (विवेचनात्मक) बृहद् इतिहास" इत्युक्तस्य ग्रन्थस्य वेदाङ्गेतिहास प्रतिपादिके १९८३ तमे क्रैस्ताब्दे होश्यारपुरे प्रकाशिते षष्ठे खण्डे कुन्दनलालशर्मणोक्तमस्ति। (आचार्य, सन् २००५, पृ ४५)

## निष्कर्षः

वैदिककालादेव समग्रवाङ्मये ज्योतिषशास्त्रस्य स्थानं महत्त्वपूर्णमस्तीति सर्वे आमनन्ति। चतुर्वर्गप्रदायकस्य वेदस्याङ्गरूपं ज्योतिषशास्त्रं वेदाङ्गं भजते। अङ्गाङ्गिनोरभेदात् यथा वेदज्ञानं रहस्यं परमत्त्वानुबन्धीत्यभिहितं तथैव वेदाङ्गमपि स्यात्। ज्योतिषस्य ज्ञानमपि तथैव गुह्यं तत्त्वानुबन्धि च स्यात्। अतो ज्यौतिषशास्त्रस्य सम्यग्ज्ञाने धर्मादिचतुर्वर्गलाभो भवतीति न कोऽपि सन्देहः। सिद्धान्तंहिता होरेति त्रिषु स्कन्धेषु विभक्ते ज्योतिषशास्त्रे नैकविधानि ग्रन्थरत्नानि सन्ति। लगधप्रणीतं वेदाङ्गज्योतिषम् तथा भास्करप्रणीतः सिद्धान्तशिरोमणिः ज्योतिषशास्त्रस्य महत्त्वपूर्णं ग्रन्थद्वयं मन्यते। एतयोर्द्वयोर्ग्रन्थयोर्मध्ये साम्यवैषम्यरीत्याध्ययनमद्यापि कृतं न दृश्यते कैश्चिदपि विद्वद्भिः। अतः एतयोर्ग्रन्थयोस्तुलनात्मकं अध्ययनमावश्यकमिति एतस्य निष्कर्षः।

## सन्दर्भग्रन्थसूची


आचार्य, भास्कर, (२०४५), *सिद्धान्तशिरोमणि*, वाराणसीः चौखम्बा संस्कृत संस्थान।

आचार्य, भास्कर, (सन् १९८८), *सिद्धान्तशिरोमणेः गोलाध्याय*, (केदारदत्त जोशी,व्या.), दिल्लीः मोतीलाल बनारसीदास।

आर्यभट, (सन् २००८), *आर्यभटीयम्*, (डा. सत्यदेव शर्मा, भाष्यकार), वाराणसीः चौखम्बा सुरभारती प्रकाशन।

ठक्कुरमुरलीधर, (वि. सं. २००७) *सिद्धान्तशिरोमणिः*, व्याख्याकार, वाराणसी:चौखम्बा संस्कृत सिरिज अफिस।

दाहाल, लोकमणि, (सन् २०१७), *भारतीयज्योतिषशास्त्रस्येतिहासः*, वाराणसीः चौखम्बा सुरभारती प्रकाशन।

दीक्षित, शङ्कर बालकृष्ण, (सन् २००२), *भारतीय ज्योतिष*, (शिवनाथ झारखण्डी, अनु.), लखनउः उत्तरप्रदेश हिन्दी संस्थान।

लगध, (२००५), *वेदाङ्गज्योतिष*, (आचार्य शिवराज कौण्डिन्न्यायन, व्याख्या.) वाराणसीः चौखम्बा विद्या भवन।

शर्मा, डा.प्रेमकुमार, (सन् २००५), *सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः*, दिल्लीः नाग पब्लिसर्स।

शास्त्री, कपिलेश्वर (सम्पा.) (२०५२), *सूर्यसिद्धान्त*, वाराणसीः चौखम्बा संस्कृतसंस्थान।

शास्त्री, गिरिजाशंकर, (२०६०), *वैदिक ज्योतिष*, प्रयागः ज्योतिष कर्मकाण्ड एवं अध्यात्म शोध संस्थान।